"नैमित्तिकलयं प्रपञ्चयिष्यन्निमेषादिक्रमेण प्रथमोक्तमेव कल्पप्रमाणमनुस्मारयति निमेष इति सप्तभिः। मात्रैव मात्रं प्रमाणं यस्य। एकमात्रलघ्वक्षरोच्चारणकालसंमितो हि निमेषः। निमेषकालतुल्या हि मात्रा लघ्वक्षरञ्च यदिति शब्दशास्त्रोक्तेः। नाड़िकाज्ञानोपायमाह। उन्मानेनेति सार्द्धेन। अम्भस उन्मानेन उन्मीयते अनेनेत्युन्मानं पात्रम्। षड्भिरिति योगे चयोदशसार्द्धद्वादशेत्यर्थः। उन्मानरूपेण घटितानि सार्द्धद्वादशपलानि सा नाड़िका। सार्द्धद्वादशपलताम्रनिर्म्मितपात्रेण सा नाड़िका ज्ञातव्येत्यर्थः। किं प्रमाणं तत् पात्रं कार्य्यं तदाह मागधेन प्रमाणेन जलप्रस्थस्तु संस्रुत इति। सार्द्धद्वादशपलजलेन हि मागधदेशप्रस्थः पूर्य्यते। तत्प्रमाणं पात्रं कार्य्यमित्यर्थात् सिद्धम्। ननु तथापि पात्रेण कथं नाड़िकाज्ञानं क्रियापरिच्छेद्यत्वात् कालस्येत्याशङ्क्य क्रियासिद्धये। प्रस्थादि विशिनष्टि हेम्नेति। माषः पञ्चगुञ्जः। हेम्नो माषैश्चतुर्भिश्चतुरङ्गुलेन शलाकारूपेण रचितैः कृतच्छिद्रा। एतदुक्तं भवति सार्द्धद्वादशपलताम्रमयं मागधप्रस्थसंमितजलधारणक्षमं पात्रं चतुर्म्माषचतुरङ्गुलहेमशलाकया कृताधश्छिद्रं जले स्थापितं तेन छिद्रेण यावता कालेन पूर्य्यते तावान् कालो नाड़िकेति। तथा च श्रुकः।

द्वादशार्द्धपलोन्मानं चतुर्भिश्चतुरङ्गुलैः।
स्वर्णमाषैः कृतच्छिद्रं यावत् प्रस्थजलप्लुतमिति॥")

इति तट्टीकायां श्रीधरस्वामी॥ (यथा, सूर्य्यसिद्धान्ते। १। ११।

"षड्भिः प्राणैर्विनाड़ी स्यात् तत् षष्ट्या नाड़िका स्मृता॥"

"षड्भिरिति। षट्प्रमाणैरसुभिः पानीयपलं भवति पलानां षष्ट्या घटिकोक्ता कालतत्त्वज्ञैः॥"

इति तट्टीका॥)

नाड़िकेलः, स्त्री, (नारिकेलः। रस्य ड़त्वम्।) नारिकेलः। इत्यमरटीकायां भरतः॥

नाड़िचीरं, क्ली, (नाड़िरिव चीरं यत्र।) निर्म्मञ्जनम्। इति हारावली। २१४॥ नली इति भाषा॥

नाड़िन्धमः, पुं, (नाड़ीं वंशनलीं धमतीति। ध्मा शब्दाग्निसंयोगयोः + "नाड़ीमुष्ट्योश्च।" ३। २। ३०। इति खश्। "घाध्माभाध्मेति।" ७। ३। ७८। इति धमादेशः। "खित्यनव्ययस्य।" ६। ३। ६६। इति पूर्ब्बपदस्य ह्रस्वः।) स्वर्णकारः। इत्यमरः। २। १०। ८॥ (उच्चनीचाधिरोहणात् मुहुर्मुहुर्निश्वासैर्नाड़ीं धमति उपतापयतीति। श्वासकारके, त्रि। यथा, भट्टिः। ६। ६४।

"सत्त्वमेजयविंशाद्यान् स्वगन्धयसमत्विषौ।
कथं नाड़िन्धमान् मार्गानागतौ विषमोपलान्॥")

नाड़िन्धयः, त्रि, (नाड़ीं धयतीति। धेट पाने + "नाड़ीमुष्ट्योश्च।" ३। २। ३०। इति खश्। "खित्यनव्ययस्य।" ६। ३। ६६। इति ह्रस्वः।) नाड़ीपानकर्त्ता। इति मुग्धबोधव्याकरणम्॥

नाड़िपत्रं, क्ली, (नाड़िरिव पत्रं यस्य।) नाड़ीचम्। इति शब्दमाला॥

नाड़ी, स्त्री, (नाड़ि + "कृदिकारादक्तिनः।" इति वा ङीष्।) नालम्। व्रणान्तरम्। (नाली घा इति भाषा। यथा, सुश्रुते निदानस्थाने १० अध्याये।

"तस्यातिमात्रगमनाद्गतिरित्यतश्च
नाड़ीव यद्वहति तेन मता तु नाड़ी॥"

दन्तमूलगता नाड्यो यथा, तत्रैव १६ अध्याये।

"नालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः।
दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः॥")

शिरा। गण्डदूर्व्वा। कुहनचर्य्या। षट्क्षणकालः। इति मेदिनी। ड़े, १६॥ शिरार्थे पर्य्यायः। धमनिः २ सिरा ३। इत्यमरः। २। ६। ६५॥ नाड़िः ४ नालिः ५ नाली ६ धमनी ७ शिरा ८। इति भरतः॥ धरणी ६ धरा १० तन्तुकी ११ जीवितज्ञा १२ सिंहा १३। इति राजनिर्घण्टः॥ *॥ कायनाड़ी त्रिविधा। एका वायुवहा। अपरा मूत्रविड़स्थिरसवाहिनी। अपरा आहारवाहिनी। इति भरतः॥ "सा तु गर्भस्थबालकस्य सप्तभिर्मासैर्भवति।" इति मुग्धबोधः॥ (यथा, तोड़लतन्त्रे ८ उल्लासे।

श्रीदेव्युवाच।

"सार्द्धत्रिकोटिनाड़ीनामालयश्च कलेवरम्।
क्रमेण श्रोतुमिच्छामि तद्वदस्व मयि प्रभो!॥

श्रीशिव उवाच।

लोम्नि कूपे सपादार्द्धकोटयश्चैव सुन्दरि!।
हस्तास्ये च तथा पादेऽमिलच्च नाड़यः स्थिताः॥
उदरे च तथा पायौ पञ्चलक्षाः प्रकीर्त्तिताः।
हृदादिसर्व्वगात्रेषु नवलक्षाः प्रकीर्त्तिताः॥
अथ पार्श्वे तथा चर्म्मे तथैव सर्व्वसन्धिषु।
सहस्रन्यूनं स्थितं लक्षं शरीरे नाड़यः प्रिये!॥
ईड़ा च पिङ्गला चैव सुषुम्ना चित्रिणी तथा।
ब्रह्मनाड़ी च यन्मध्ये पञ्च नाड्यः प्रकीर्त्तिताः॥
कुहूश्च शङ्खिनी चैव गान्धारी हस्तिजिह्विका।
नर्द्दिनी च तथा निद्रा रुद्रसंख्या व्यवस्थिता॥
एता नाड्यः परेशानि! सुषुम्नायाः प्रजायते॥")

नाड़ीक्रममाह।

"सार्द्धत्रिकोट्यो नाड्यो हि स्थूलाः सूक्ष्माश्च देहिनाम्।
नाभिकन्दनिबद्धास्तास्तिर्य्यगूर्द्ध्वमधःस्थिताः॥
द्विसप्ततिसहस्रन्तु तासां स्थूलाः प्रकीर्त्तिताः।
देहे धमन्यो धन्यास्ताः पञ्चेन्द्रियगुणावहाः॥

तासाञ्च सूक्ष्मसुषिराणि शतानि सप्त
स्युस्तानि यैरसकृदन्नरसं वहद्भिः।
आप्याय्यते वपुरिदं हि नृणाममीषामम्भःस्रवद्भिरिव सिन्धुशतैः समुद्रः॥
आपादतः प्रततगात्रमशेषमेषामामस्तकादपि च नाभिपुरःस्थितेन।
एतन्मृदङ्ग इव चर्म्मचयेन नद्धं
कायं नृणामिह शिराशतसप्तकेन॥

सप्तशतानां मध्ये चतुरधिका विंशतिः स्फुटा तासां एका परीक्षणीया या दक्षिणकरचरणविन्यस्ता। चतुरधिकेति तदुक्तम्।

तिर्य्यक् कूर्म्मो देहिनां नाभिदेशे
वामे वक्त्रं तस्य पुच्छञ्च याम्ये।
ऊर्द्ध्वे भागे हस्तपादौ च वामौ
तस्याधस्तात् संस्थितौ दक्षिणौ तौ॥

वक्त्रे नाड़ीद्वयं तस्य पुच्छे नाड़ीद्वयन्तथा।
पञ्च पञ्च करे पादे वामदक्षिणभागयोः॥

तासां मध्ये एकेति एकस्या एव पादादूर्द्ध्वगमनात् दक्षिणेति प्राधान्यं पुरुषाश्रया। यदुक्तम्।

वामे भागे स्त्रिया योज्या नाड़ी पुंसस्तु दक्षिणे।
इति प्रोक्ता मया देवि! सर्व्वदेहेषु देहिनाम्॥"

नपुंसकस्य तु स्त्रीपुंसयोरन्यतराकारप्रकटतामपेक्ष्य परीक्षा। साम्यन्तु न स्यादेव। कृत्रिमस्य तु प्रकृतिस्थता। चरणेति वामस्य तु दक्षिणग्रन्थिपश्चात् पार्श्वस्था दक्षिणस्य तु वामग्रन्थिपश्चात् पार्श्वस्थैव सदुपदेशात्। करस्था तु वक्ष्यते॥ *॥

परीक्षाप्रकारमाह।

सव्येन रोगधृतिकूर्परभागभाजा
पीड्याथ दक्षिणकराङ्गुलिकात्रयेण।
अङ्गुष्ठमूलमधिपश्चिमभागमध्ये
नाड़ीं प्रभञ्जनगतिं सततं परीक्षेत्॥

सव्येन करेण। रोगधृतिर्दृढधारणमित्यापीड़ने हेतुः। रोगाणां वातादिपिशुनवायूनां धारणं यथा स्यात्तथा पीड्येति कश्चित्। भाग इति समुदितकफोणिपरं भाजेति परीक्षाकालेऽपि तत्र हस्तस्थितये। आपीड्येत्यर्थान्नाड़ीं एतच्चापीड़नं वातादिपौर्व्वापर्य्यबोधनाय। अथेत्यापीड़नानन्तरं न तु परीक्षाकालेऽप्यापीड़नस्थितिः। दक्षिणेति प्रायिकं स्वपरीक्षायामन्यथात्वात्। त्रयेति योग्यतया तर्ज्जनीमध्यमानामिकाग्रहणम्। पश्चिमेत्यङ्गुष्ठस्याधोभागः। मूलेति तदुक्तम्।

अङ्गुष्ठस्य तु मूले या धमनी जीवसाक्षिणी।
तस्या गतिवशाद्विद्यात् सुखं दुःखञ्च देहिनाम्॥

प्रभञ्जनगतिर्यत्रेति नाथन्तरनिरासः। सततमिति सुस्थदशायामपि। तदुक्तम्। भाविरोगाभिबोधाय सुस्थनाड़ीपरीक्षणमिति॥ *॥

परीक्षणीयमाह।

वातं पित्तं कफं द्वन्द्वं सन्निपातन्तथैव च।
साध्यासाध्यविवेकञ्च सर्व्वं नाड़ी प्रकाशयेत्॥

सन्निपातमिति सामान्यतः। साध्यासाध्यमिति विशेषतश्चेत्यर्थः। सर्व्वमित्येतदन्यच्च रोगादिकमित्युपसंहारः।" इति नाड़ीप्रकाशे प्रथमोद्योतः॥ *॥ अथ नाड़ीज्ञानसमयमाह।

"प्रातः कृतसमाचारः कृताचारपरिग्रहम्।
सुखासीनः सुखासीनं परीक्षार्थमुपाचरेत्॥"

प्रातरिति प्रायिकं मध्याह्ने उष्णता इत्युक्तेः॥ *॥